## विस्पष्टादीनि गुणवचनेषु । (२४/३७५८)

विस्पष्टादीनि पूर्वपदानि गुणवचनेषु उत्तरपदेषु प्रकृतिस्वराणि भवन्ति । विस्पष्टकटुकम् । विचित्रकटुकम् । व्यक्तकटुकम् । विस्पष्टलवणम् । विचित्रलवणम् । व्यक्तलवणम् । विस्पष्टं कटुकम् इति विगृह्य सुप्सुपा इति समासः । विस्पष्टादयो ह्यत्र प्रवृत्तिनिमित्तस्य विशेषणम्[1] । कटुकादिभिश्च शब्दैर्गुणवद् द्रव्यमभिधीयते इत्यसामानाधिकरण्यमतो नास्ति कर्मधारयः । विस्पष्टशब्दो 'गतिरनन्तरः' (६.२.४९/३७८३) इत्याद्युदात्तः । विचित्रशब्दोऽपि अव्ययस्वरेण[2] । विचित्तशब्दमन्ये पठन्ति । सोऽपि बहुव्रीहिस्वरेणाद्युदात्त एव । व्यक्तशब्दः 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' (८.२.४/३६५७) [3]इत्यादिस्वरितः ।

ये चात्रापरे पठ्यन्ते तत्र सम्पन्नशब्दस्थाथादिस्वरेणान्तोदात्तः । पटुपण्डितशब्दौ प्रत्ययस्वरेण । कुशलशब्दः कृत्स्वरेणा[4]न्तोदात्तः । चपलशब्दश्चित्स्वरेणा[5]न्तोदात्तः, 'चुपेरच्चोपधायाः' (उ. ११६) इत्यत्र हि चिदिति वर्तते । निपुणशब्दस्थाथादिस्वरेणा[6]न्तोदात्तः , पुणेरिगुपधलक्षणः कप्रत्ययोऽयम् । विस्पष्टादीनीति किम् ? परमलवणम् । उत्तमलवणम् । गुणवचनेषु इति किम् ? [7]विस्पष्टब्राह्मणः ।

विस्पष्ट । विचित्र । व्यक्त । सम्पन्न । पटु । पण्डित । कुशल । चपल । निपुण । विस्पष्टादिः ॥

## श्रज्यावमकन्पापवत्सु भावे कर्मधारये । (२५/३७५९)

श्र ज्य अवम कन् इत्येतेषु [8]पापशब्दवति चोत्तरपदे कर्मधारये समासे [9]भाववाचि पूर्वपदं प्रकृतिस्वरं भवति । गमनश्रेष्ठम् । गमनश्रेयः । ज्य–वचनज्येष्ठम् । वचनज्यायः । अवम–गमनावमम् । वचनावमम् । कन्–गमनकनिष्ठम् । गमनकनीयः । पापवत् – गमनपापिष्ठम् । गमनपापीयः । ल्युडन्तान्येतानि पूर्वपदानि लित्स्वरेणाद्युदात्तानि । श्रज्यकनामादेशानां ग्रहणम् इति सामर्थ्यात्तद्वदुत्तरपदं गृह्यते । आदिष्विति किम् ? गमनशोभनम् । भावे इति किम् ? गम्यतेऽनेन इति गमनं तत् श्रेयः, गमनश्रेयः । कर्मधारये इति किम् ? [10]गमनं श्रेयः गमनश्रेयः ॥

## कुमारश्च । (२६/३७६०)

कुमारशब्दः पूर्वपदं कर्मधारये समासे प्रकृतिस्वरं भवति । कुमारश्रमणा । कुमारकुलटा । [11]कुमारतापसी । कुमारशब्दोऽन्तोदात्तः । [12]अत्र केचित् 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्' (व्या.प. ३) इति परिभाषया 'कुमारश्रमणादिभिः' (२.१.७०/७५५) इत्यत्रैव समासे स्वरमेतमिच्छन्ति । केचित् पुनरविशेषेण सर्वत्रैव कर्मधारये ॥

## आदिः प्रत्येनसि । (२७/३७६१)

कर्मधारये इति वर्तते । प्रतिगत एनसा, प्रतिगतमेनो वा यस्य स प्रत्येनाः । तस्मिन्नुत्तरपदे कर्मधारये[13] कुमारस्यादिरुदात्तो भवति । कुमारप्रत्येनाः । उदात्तः इत्येतदत्र सामर्थ्याद् वेदितव्यम् । [14]पूर्वपदप्रकृतिस्वर एव ह्ययमादेरुपदिश्यते ॥

---

1. न द्रव्यस्य इत्यधिकम् ब.क.ड.फ. 2. आद्युदात्तः इत्यधिकम् ह. 3. इत्यादिना फ. ह. 4–5–6. अन्तोदात्तः नास्ति फ. 7. विस्पष्टब्राह्मणः नास्ति क. 8. पापशब्दवति नास्ति फ. 9. भाववाचि नास्ति फ. ह, भावयति इति क. 10. गमनस्य ब.क.ड. 11. कुमारीतापसी ह. 12. तत्र फ. 13. समासे इत्यधिकम् क. फ. 14. पूर्वपदप्रत्ययः तस्य तद्राजस्य फ.